॥ नारायणवर्म ॥

राजोवाच

यया गुप्तः सहस्राक्षः सवाहान रिपुसैनिकान ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम ॥ १ ॥

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम ।
यथाऽततायिनः शत्रून येन गुप्तोऽजयन्मृधे ॥ २ ॥

श्रीशुक उवाच

वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच

धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ॥ ४ ॥

नारायणमयं वर्म सन्नह्येद्भय आगते ।

www.yousigma.com

दैवभूतात्मकर्मभ्यो नारायणमयः पुमान ॥ ५ ॥

पादयोर्जानुनोरूर्वोरुदरे हृदयथोरसि ।
मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत ॥ ६ ॥

नमो नारायणायेति विपर्ययमथापि वा ।
करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ ७ ॥

प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ।
न्यसेद्धृदय ओंकारं विकारमनु मूर्धनि ॥ ८ ॥

षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत ।
वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु ॥ ९ ॥

मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः ।
सविसर्गं फडंतं तु सर्वदिक्षु विनिर्दिशेत ॥ १० ॥

"ओं विष्णवे नमः"

इत्यात्मानं परं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम ।
विद्यातेजस्तपोमूर्तिरिमं मंत्रमुदाहरेत ॥ ११ ॥

www.yousigma.com

हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगॆंद्रपृष्ठॆ ।
दरारिचर्मासिगदॆषुचापपाशान दधानॊऽष्टगुणॊऽष्टबाहुः ॥ १२ ॥

जलॆषु मां रक्षतु मत्स्यमूर्तिर्यादॊगणॆभ्यॊ वरुणस्य पाशात ।
स्थलॆ च मायावटुवामनॊऽव्यात त्रिविक्रमः खॆऽवतु विश्वरूपः ॥ १३ ॥

दुर्गॆष्वटव्याजिमखादिषु प्रभुः पायान्नृसिंहॊऽसुरयूथपारिः ।
विमुंचतॊ यस्य महाट्टहासं दिशॊ विनॆदुर्न्यपतंश्च गर्भाः ॥ १४ ॥

रक्षत्वसौ माऽध्वनि यज~झकल्पः स्वदंष्ट्रयॊन्नीतधरॊ वराहः ।
रामॊऽद्रिकूटॆष्वथ विप्रवासॆ सलक्ष्मणॊऽव्याद्भरताग्रजॊ माम ॥ १५ ॥

मामुग्रधन्वा निखिलप्रमादान्नारायणः पातु नरश्च हासात ।
दत्तस्त्वयॊगादथ यॊगनाथः पायाद्‌गुणॆशः कपिलः कर्मबंधात ॥ १६ ॥

सनत्कुमारॊऽवतु कामदॆवाद्धयशीर्षॊ मां पथि दॆवहॆलनात ।
दॆवर्षिवर्यः पुरुषांतरार्चनात कूर्मॊ हरिर्मां निरयादशॆषात ॥ १७ ॥

धन्वंतरिर्भगवान पात्वपथ्याद्द्वंद्‌वाद्भयादृषभॊ निर्जितात्मा ।

यज्ञश्च लोकादुत तत्कृतान्नो बलो गणात क्रोधवशादहींद्रः ॥ १८ ॥

द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाखंडगणात प्रमादात ।
कल्की कलेः कालमलात प्रपातु धर्मावनायोरुकृतावतारः ॥ १९ ॥

मां केशवो गदया प्रातरव्याद्गोविंद आसंगव आत्तवेणुः ।
नारायणः पातु सदाऽऽत्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ॥ २० ॥

देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो माम ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ २१ ॥

श्रीवत्सलक्ष्माऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसंध्यं प्रभाते विष्णुः श्रीमान भगवान कालमूर्तिः ॥
२२ ॥

चक्रं युगांतानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तम ।
दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वायुसखो हुताशः ॥ २३ ॥

गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियाऽसि ।
कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन ॥ २४ ॥

www.yousigma.com

त्वं यातुधानप्रमथप्रॆतमातृपिशाचविप्रग्रहघॊरदृष्टीन ।
दरॆंद्र विद्रावय कृष्णपूरितॊ भीमस्वनॊऽरीन हृदयानि कंपयन ॥ २५ ॥

त्वं तिग्मधाराऽसि वरारिसैन्यमीशप्रयुक्तॊ मम छिंदि छिंदि ।
चक्षूंषि चर्मन शतचंद्र छादय द्विषामघं नॊ हर पापचक्षुषाम ॥ २६ ॥

यन्नॊ भयं ग्रहॆभ्यॊऽभूत कॆतुभ्यॊ नृभ्य ऎव च ।
सरीसृपॆभ्यॊ दंष्ट्रिभ्यॊ भूतॆभ्यॊऽघॆभ्य ऎव च ॥ २७ ॥

सर्वाण्यॆतानि भगवन्नामरूपास्त्रकीर्तनात ।
प्रयांतु संक्षयं सद्यॊ यॆऽन्यॆ श्रॆयःप्रतीपकाः ॥ २८ ॥

गरुडॊ भगवान स्तॊत्रस्तॊमच्छंदॊमयः प्रभुः ।
रक्षत्वशॆषकृच्छ्रॆभ्यॊ विष्वक्सॆनः स्वनामभिः ॥ २९ ॥

सर्वापद्भ्यॊ हरॆर्नामरूपयानायुधानि नः ।
बुद्धींद्रियमनःप्राणान पांतु षार्षदभूषणाः ॥ ३० ॥

यथा हि भगवानॆव वस्तुतः सदसच्च यत ।
सत्यॆन तॆन नः सर्वॆ यांतु नाशमुपद्रवाः ॥ ३१ ॥

यथैकात्म्यानुभावेन विकल्परहितः स्वयम ।
भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥

तेनैव सत्यमानेन सर्वज्ञो भगवान हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥

विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान नारसिंहः ।
प्रहापयन लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ ३४ ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम ।
विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान ॥ ३५ ॥

एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशेत सद्यः साध्वसात स विमुच्यते ॥ ३६ ॥

न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत ।
राजदस्युग्रहादिभ्यो व्याध्यादिभ्यश्च कर्हिचित ॥ ३७ ॥

इमां विद्यां पुरा कश्चित कौशिको धारयन द्विजः ।
योगधारणया स्वांगं जहौ स मरुधन्वनि ॥ ३८ ॥

तस्योपरि विमानेन गंधर्वपतिरेकदा ।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥

सांगनो न्यपतत सद्यः सविमानो ह्यवाक्शिराः ।
विद्यामिमां धारयतो मृतस्यास्थिविलंघनात ॥ ४० ॥

स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात ॥ ४१ ॥

य इदं शृणुयात काले यो धारयति चादृतः ।
तं नमस्यंति भूतानि मुच्यते सर्वतो भयात ॥ ४२ ॥

श्रीशुक उवाच

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान ॥ ४३ ॥

॥ इति श्रीमद्भागवते षष्ठस्कंधे नारायणवर्मोपदेशः ॥

www.yousigma.com